# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा–अक्टूबर, २०१९

| कक्षा –शास्त्री–३ (SEM-5) | प्रश्नपत्रम् — ५ (C.C- 3.5.9 ) सन्दर्भग्रन्थः- सिद्धान्तलक्षणम् | |
|---|---|---|
| विषयः - नव्यन्यायः | | गुणाः - ७० |
| दिनाङ्कः - १४/१०/२०१९ | | समयः- ३ तः ६ |

(विभागः-1)

प्र- 1 द्वौ समाधेयौ। 10

1. साध्यसामानाधिकरण्यं व्याप्तिः। व्याख्यात।
2. महानसीयवह्निमादाय अव्याप्तिमाशङ्क्य परिहरत।
3. अव्याप्यवृत्तिसाध्यकसध्देतुस्थले अव्याप्तिं प्रतिपादयत।

प्र-2 एकः समाधेयः। 10

1.परम्परासम्बन्धमादाय दण्डिमान् दण्डिसंयोगात् – इत्यत्र लक्षणसमन्वयं कुरुत।

2.वह्निमान् धूमात् – इत्यत्र मणिकृतसिद्धान्तलक्षणस्य समन्वयं कुरुत।

(विभागः-2)

प्र- 3 द्वौ समाधेयौ। 10

1. प्रतियोगितावच्छेदकसम्बन्धावच्छिन्नत्वस्य कृत्यं ब्रूत।
2. यो यदीययावद्विशेषाभाववान् स तत्सामान्याभाववान् – इत्यत्र सामान्यमुखीव्याप्तिं प्रदर्श्यताम्।
3. साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्यस्य पक्षधर्मत्वमुपपन्नमिति – उपाध्यायमतं व्याख्यात।

प्र-4 एकः समाधेयः। 10

1. यथाग्रन्थं व्याप्तेः द्वैविध्यं प्रतिपादयत।
2. भेदप्रतियोगितावच्छेदकत्वं किमर्थं स्वीक्रियते ? विवृणुत।

(विभागः-3)

प्र- 5 द्वौ समाधेयौ। 10

1. सत्तावान् जातेः – इत्यत्र अतिव्याप्तिमाशङ्क्यताम्।
2. 'साध्यादिभेदेन व्याप्तेः भेदात्' व्याख्यात।
3. संयोगि द्रव्यत्वात् – इत्यत्र दोषमुद्भाव्यताम्।

प्र-6 एकः समाधेयः ।   10

1. वृक्षः संयोगसामान्याभाववान् संयोगीययावद्विशेषाभाववत्त्वात् – इत्यनुमाने हेत्वसिद्धिं शङ्क्यताम् ।
2. प्रतियोगिवैयधिकरण्यस्य कृत्यं ब्रूत ।

(विभागः-4)

प्र-7 एकवाक्येन दश समाधेयाः ।   10

1. दीधितिकारः कः ?
2. मणिकारीयं सिद्धान्तव्याप्तिलक्षणं लिखत ।
3. दण्डिमान् दण्डिसंयोगात्- इत्यत्र साध्यतावच्छेदकं किम् ?
4. स्वरूपसम्बन्धरूपावच्छिन्नत्वं नाम किम् ?
5. व्यासज्यवृत्तिधर्मः कः ?
6. साध्यतावच्छेदकसम्बन्धः कः ?
7. महानसीयवह्न्यभावप्रतियोगितायाः अवच्छेदकं किम् ?
8. पृथिवीत्वव्याप्यजातिमद्वान् पृथिवीत्वात् – इत्यत्र पक्षसाध्यहेतून् लिखत ।
9. विभुविशेषगुणाः के ?
10. दण्डिमान् द्रव्यत्वात् – इत्यत्र कः दोषः ?
11. गुरुधर्मस्य अवच्छेदकत्वं सम्भवति उत न ?
12. परामर्शः कः ?
13. किन्नाम कूटवत्वम् ?
14. प्रतियोगितावच्छेदकत्वं कुत्र निवेश्यते ।
15. सामान्यस्य लक्षणं लिखत ।

*****************

# उत्तराणि

1. रघुनाथ शिरोमणिः ।
2. प्रतियोग्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकतावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।
3. दण्डिमान् दण्डिसंयोगात्- इत्यत्र साध्यतावच्छेदकं दण्डत्वम् ।
4. स्वरूपसम्बन्धरूपावच्छिन्नत्वं - अन्यूनागुरु-अनतिरिक्तवृत्तिधर्मावच्छिन्नत्वम् ।
5. व्यासज्यवृत्तिधर्मः - उभयवृत्तिधर्मः ।
6. साध्यतावच्छेदकसम्बन्धः - येन सम्बनधेन साध्यः स्वाधिकरणे वर्तते स सम्बन्धः ।
7. महानसीयवह्न्यभावप्रतियोगितायाः अवच्छेदकं - महानसीयत्वसहितवह्नित्वम् ।
8. पृथित्वव्याप्यजातिमद्वान् पृथिवीत्वात् – इत्यत्र पक्षः – पृथिवी साध्यः – पृथित्वव्याप्यजातिमत्वम् , हेतुः- पृथिवीत्वम् ।
9. विभुविशेषगुणाः - शब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराः ।
10. दण्डिमान् द्रव्यत्वात् – इत्यत्र अतिव्याप्तिः दोषः ।
11. गुरुधर्मस्य अवच्छेदकत्वं न भवति ।
12. परामर्शः - साध्यव्याप्यहेतुमान् पक्षः ।
13. कूटवत्वम् - यावदभाववत्त्वम् ।
14. प्रतियोगितावच्छेदकत्वं यद्धर्मे निवेश्यते ।
15. नित्यमेकमनेकानुगतं सामान्यम् ।